रश्मिरेषामधः” ऋ० १०।१२९।५। २वक्रे च “ईक्षमाणः पापेन तिरश्चीनेन चक्षुषा” भाग० ७।८।४।

**तिरस्** अव्य० तॄ—असुन् स्वरादि। १अन्तर्द्धाने २तिर्य्यगर्थे च अमरः। ३तिरस्कारे क्षीरस्वामी। अस्य कृञि वा उप० स०। तिरस्कृत्य तिरः कृत्वेति “तिरस्कृत्योच्चरेत् काष्ठेत्यादि मनुः “तिरस्क्रियन्ते कृमितन्तुजालैः” माघः। तिरस्करोति णिच्—सलोपः। तिरयति आच्छादयतीत्यर्थः। “मुरारिमुखाम्बुजस्य तिरयं तिरयन्नपि वेदनाम्” जयदेवः।

**तिरस्कर** त्रि० तिरःकरोति कृ—ट। आच्छादके। स्त्रियां ङीप्। “अहो वत स्वर्यशसस्तिरस्करी कुशस्थली पुण्ययशस्करी भुवः” भाग० १।१०।२८।

**तिरस्करिणी** स्त्री तिरः करोति कृ—णिनि संज्ञापूर्वकविधेरनित्यत्वात् वृद्ध्यभावः ङीप्।(परदा) (कानात)। पटमये आच्छादकपदार्थे. अमरः। “तिरस्करिण्यो जलदा भवन्ति” कुमा०। २आच्छादकमात्रे त्रि० “सोऽत्यासाद्यत तद्वेश्म तिरस्करिणमन्तरा” रामा० अयो० १५ स०।

**तिरस्कार** पु० तिरस्+कृ—भावे घञ्। १अनादरे हला०। कर्त्तरि अण्। २अवज्ञाकारके त्रि०। “लौहस्तिरस्कार इवात्तमन्युः”किराता०।

**तिरस्कारिन्** त्रि०तिरः करोति कृ—णिनि ६त०। १आच्छादके (कानात) २पटभेदे स्त्री ङीप्। ३अवज्ञाकारके ति०

**तिरस्कृत** त्रि०तिरस्+कृ—कर्म्मणि क्त। १अवज्ञाते अनादृते २आच्छादिते च अमरः“अविवक्षितवाच्यो यस्तत्र वाच्यं भवेद्ध्वनौ। अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम्”काव्यप्र०। ४तन्त्रसारोक्ते मन्त्रभेदे पु० “यस्य मध्ये दकारोऽस्ति कवचं मूर्द्धनि द्विधा। अस्त्रं तिष्ठति मन्त्रः स तिरस्कृत उदीर्य्यते”।

**तिरस्क्रिया** स्त्री तिरस्+कृ—भावे श। १अनादरे २तिरस्कारे अमरः २आच्छादने च “अप्रकटीकृतशक्तिः शक्तोऽपि जनात्तिरस्क्रियां लभते” पञ्चत०। “द्विपद्विषः प्रत्युत सा तिरस्क्रिया” माघ०। [तिरस्कृति अनिरस(स्त्री)त्।

**तिरस्य** पु० तिरस्+कण्ड्वा० यक् अन्तर्द्धाने सक० सेट्।

**तिरिट** पु० तॄ—बा० इटक्। इत्युग्रन्थौ शब्दमा०।

**तिरिम** पु० तॄ—बा० इमक्। शालिभेदे राजनि०।

**तिरिष** पु० तॄ—बा० इषक्। शालिभेदे राजनि०।

**तिरीट** न० तॄ—ईटक्। लोध्रवृक्षे उज्ज्वलद०।

**तिरीटक** पु० तिरीट+संज्ञायां कन्। लोध्रे अमरः।

**तिरोधान** न० तिर+धा—भावे ल्युट्। १अन्तर्द्धाने भावे अङ्। तिरोधाप्यत्र स्त्री।

**तिरोभाव** पु० तिरस्+भू—भावे घञ्। १गुप्तभावे २अन्तर्द्धाने।

**तिरोहित** त्रि० तिरस्+धा—क्त।१अन्तर्हिते गुप्ते २आच्छादिते च“अतिरोहितमन्यत्” तत्त्वकौ०“एष ह वै पुरोहितो य एवं वेदाथ स तिरोहितो य एवं न वेद”ऐत०ब्रा० “न चासारं न च न्यूनं न दूरे न तिरोहितम्” मनुः

**तिर्य्यक्पातिन्** त्रि० तिर्य्यक् पतति पत—णिनि। वक्रप्रसारिते कुटिलवृत्तौ शब्दार्थचि०।

**तिर्य्यक्प्रमाण** न० कर्म्म०। विस्तारप्रमाणे।

**तिर्य्यक्स्रोतस्** पु० तिर्य्यक् स्रोतो आहारसञ्चारो यस्य। पशुपक्ष्यादौ तेषामशितान्नस्य तिर्य्यक्तया उदरे सञ्चारात् तथात्वम्। तद्भेदाभाग०। ३।१०।२१

“तिरश्चामष्टमः सर्गः सोऽष्टाविंशद्विधोमतः। अविदो भूरितमसो घ्राणज्ञा हृद्यवेदिनः। गौरजो महिषः कृष्णः सूकरो गवयोरुरुः। द्विशफाः पशवश्चेमे अविरुष्ट्रश्च सत्तम!। खरोऽश्वोऽश्वतरो गौरः शरभश्चमरी तथा। एते चैकशफाः क्षत्तः! शृणु पञ्चनखान् पशून्। श्वा शृगालो वृको व्याघ्रो मार्ज्जारः शशशल्लकौ। सिंहः कपिर्गजः कूर्म्मो गोधा च मकरादयः। कङ्कगृध्रवकश्येनभासभल्लूकवर्हिणः। हंससारसचक्राह्वकाकोलूकादयः खगाः।”

“तिर्य्यक्स्रोतसां सर्गमाह तिरश्चामिति। स चाष्टाविंशतिभेदः। तिरश्चां लक्षणम् अविदः श्वस्तनादिज्ञानशून्याः। भूरितमसः आहारादिमात्रनिष्ठाः। घ्राणज्ञाः घ्राणेनैवेष्टमर्थं जानन्ति हृदि अवेदिनः दीर्घानुसन्धानशून्याः। तथा च श्रुतिः “अथेतरेषां पशूनाम् अशनापिपासे एवाभिविज्ञानं न विज्ञातं वदन्ति न विज्ञातं पश्यन्ति न विदुः श्वस्तनं न लोकालोकाविति”। अष्टाविंशतिभेदानाह गवादय उष्ट्रान्ताः द्विशफाः द्विखुरा नव गवादयः चमर्य्यन्ता एकशफाः षट्। श्वादयो गोधान्ताः पञ्चनखाद्वादश। एवमेते भूचराः सप्तविंशतिः, मकरादयो जलचराः कङ्कादयश्च खगाः। अभूचरत्वेनैकीकृत्य गृहीताः। तदेवमष्टाविंशतिभेदान् वदन्ति। तेषु कृष्णरुरुगौराः मृगविशेषाः अन्येषामपि तिर्य्यक्प्राणिनामेतेष्वेव यथायथमन्तर्भावः।”

**तिर्य्यग्योनि** स्त्री तिरश्चां योनिः पशुपक्ष्यादिजातौ “स लिङ्गिनां हरत्येनस्तिर्य्यग्योनौ च जायते” मनुः।